# TDP (Honours) 3rd Semester Exam., 2021
## ( Held in 2022 )

## SANSKRIT

## ( Honours )

## THIRD PAPER

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

Answer **eight** questions, taking **two** from each Unit

*Candidates are required to give their answers in their own words as far as practicable*

### UNIT—I

1. *(a)* Make an estimate of Bāṇabhaṭṭa as a prose-writer with reference to your text. 10

*Or*

*(b)* Give a brief account of the fickleness of the character of Lakṣmī as advised by Śukanāsa to prince Candrāpīḍa.

2. Translate preferably in English any *two* of the following : 5×2=10

(a) कुसुमशरशरप्रहारजर्ज्जरिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणश्च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलः, किं वा प्रशमहेतुनापि न प्रचण्डतरो भवति वाडवानलो वारिणा।

(b) अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽत्यन्ततीव्रः दर्पदाहज्वरोष्मा।

(c) सततममूलमन्त्रशम्यो विषमो विषयविषास्वादमोहः। नित्यमस्नानशौचबाध्यः बलवान् रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति।

3. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य।

(b) अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः।

UNIT—II

4. (a) Discuss the literary style of Bhāravi with special reference to your prescribed text. 10



Scanned with CamScanner

*Or*

(b) Reproduce in your own words the speech of Draupadī as described in your text *Kirātārjunīyam*, Canto I.

5. Translate preferably in English any *two* of the following : 5×2=10

(a) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

(b) निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम्॥

(c) इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः॥



Scanned with CamScanner

6. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) कथाप्रसङ्गेन जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः
स दुःसहान्मन्त्रपदादिवोरगः॥

(b) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान्निशिता इवेषवः॥

## UNIT—III

7. (a) Find out precisely the value of *Bhaṭṭikāvya* as a grammatical work. 10

*Or*

(b) Give a description of the Autumn after *Bhaṭṭikāvya*, Canto II.

8. Translate preferably in English any *two* of the following : 5×2=10

(a) वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण॥



Scanned with CamScanner

(b) न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥

(c) हिरण्मयी शाललतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली॥

9. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) बलिर्बबन्धे जलधिर्ममन्थे
जह्रेऽमृतं दैत्यकुलं विजिग्ये।
कल्पान्तदुःस्था वसुधा तथोहे
येनैषभारोऽतिगुरुर्न तस्य॥

(b) गर्जन् हरिः साम्भसि शैलकुञ्जे
प्रतिध्वनीनात्मकृतान् निशाम्य।
क्रमं बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादान्॥

( Turn Over )



Scanned with CamScanner

UNIT—IV

**10.** *(a)* Give a broad account of the different varieties of विद्या as mentioned in the *Arthaśāstra* of Kauṭilya. 10

*Or*

*(b)* ''मन्त्रपूर्वाः सर्वारम्भाः''

Explain the views of Kauṭilya's predecessors and of his own on the subject of 'मन्त्रज्ञानम्' and 'मन्त्ररक्षणम्' in the light of the above statement.

**11.** Translate preferably in English any *two* of the following : 5×2=10

*(a)* 'न' इति विशालाक्षः। ''सहक्रीडितत्वात् परिभवन्त्येनम्। ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत, समानशीलव्यसनत्वात् ते ह्यस्य मर्मज्ञभयान्नापराध्यन्ति।''

*(b)* तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत। वृद्धसंयोगेन प्रज्ञाम्, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनम्, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम्।

*(c)* पराधिष्ठानमनुज्ञातः प्रविशेत्। शासनं च यथोक्तं ब्रूयात्, प्राणावाधेऽपि दृष्टे। परस्य वाचि वक्त्रे दृष्ट्यां च प्रसादं वाक्यपूजनमिष्टपरिप्रश्नं गुणकथासङ्गमासन्नमासनं सत्कारमिष्टेषु स्मरणं विश्वासगमनं च लक्षयेत्तुष्टस्य, विपरीतमतुष्टस्य।



Scanned with CamScanner

**12.** Explain in Sanskrit any *one* of the following with reference to the context : 10

(*a*) सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम्॥

(*b*) नास्य गुह्यं परे विद्युः छिद्रं विद्यात् परस्य च।
गूहेत् कूर्म इवाङ्गानि यत् स्यात् विवृतमात्मनः॥

★★★



Scanned with CamScanner

# TDP (Honours) 3rd Semester Exam., 2020
## ( Held in 2021 )

## SANSKRIT

## ( Honours )

## THIRD PAPER

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

Answer **eight** questions, taking **two** from each Unit

*Candidates are required to give their answers in their own words as far as practicable*

### UNIT—I

1. *(a)* Discuss the merits and demerits of Bāṇa's prose with illustrative reference from your text. 10

*Or*

*(b)* Why did Śukanāsa advise Candrāpīḍa? Give a brief account of the advice imparted by Śukanāsa to prince Candrāpīḍa. 2+8=10

2. Translate preferably in English any *two* of the following : 5×2=10

(*a*) अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरति-दूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

(*b*) न परिचयं रक्षति नाभिजनमीक्षते न रूपमालोकयते। न कुलक्रममनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति। न धर्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति।

(*c*) तात चन्द्रापीड! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यम-रत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्।

3. Explain in Sanskrit with reference to the context any *one* of the following : 10

(*a*) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(*b*) इयमनार्या लब्धापि खलु दुःखेन परिपाल्यते।

## UNIT—II

4. (*a*) "नारिकेलफलसम्मितं वचो भारवेः"—Explain the remark with suitable references from your text. 10

*(Continued)*



Scanned with CamScanner

*Or*

*(b)* Give a short account of the speech delivered by वनेचर to युधिष्ठिर in the *Kirātārjunīyam*, Canto I.

**5.** Translate preferably in English any *two* of the following : 5×2=10

*(a)* तथापि जिह्मः स भवज्जिगीषया

तनोति शुभ्रं गुणसम्पदा यशः।

समुन्नयन् भूतिमनार्यसङ्गमाद्

वरं विरोधोऽपि समं महात्मभिः॥

*(b)* स किंसखा साधु न शास्ति योऽधिपं

हितान्न यः संशृणुते स किम्प्रभुः।

सदानुकूलेषु हि कुर्वते रतिं

नृपेष्वमात्येषु च सर्वसम्पदः॥

*(c)* अबन्ध्यकोपस्य विहन्तुरापदां

भवन्ति वश्याः स्वयमेव देहिनः।

अमर्षशून्येन जनस्य जन्तुना

न जातहार्देन न विद्विषादरः॥



Scanned with CamScanner

6. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः॥

(b) कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम्॥

## UNIT—III

7. (a) Estimate the poetic value of the *Bhaṭṭikāvyam* citing suitable examples from your text. 10

*Or*

(b) Describe Rāma's encounter with Mārīca in the hermitage of Viśvāmitra.

8. Translate preferably in English any *two* of the following : 5×2=10

(a) निशातुषारैर्नयनाऽम्बुकल्पैः
पत्रान्त-पर्या गलदच्छ-बिन्दुः।
उपारुरोदेव नदत्-पतङ्गः
कुमुद्वतीं तीर-तरुर्दिनादौ॥



Scanned with CamScanner

*(b)* प्रभातवाताहति-कम्पिताकृतिः
कुमुद्वती-रेणु-पिशङ्ग-विग्रहम्।
निरास भृङ्गं कुपितेन पद्मिनी,
न मानिनी संसहतेऽन्य-सङ्गमम्॥

*(c)* अपूपुजन् विष्टरपाद्यमाल्यै-
रातिथ्यनिष्णा वनवासिमुख्याः।
प्रत्यग्रहीष्टां मधुपर्कमिश्रं
तावासनादि क्षितिपालपुत्रौ॥

**9.** Explain in Sanskrit with reference to the context any *one* of the following : 10

*(a)* सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

*(b)* क्षुद्रान् न जक्षुर् हरिणान् मृगेन्द्रा
विशश्वसे पक्षि-गणैः समन्तात्।
नं नम्यमानाः फल-दित्सयेव
चकाशिरे तत्र लता विलोलाः॥



Scanned with CamScanner

10. (a) Explain the utility of इन्द्रियजयः according to Kauṭilya. 10

*Or*

(b) Show how Kauṭilya asserted his own view about the appointment of अमात्यs after repudiating the views of his predecessors?

11. Translate preferably in English any *two* of the following : 5×2=10

(a) नयापनयौ दण्डनीत्याम्। बलाबले चैतासां हेतुभिरन्वीक्ष्यमाणा लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

(b) कृषिपाशुपाल्ये वणिज्या च वार्ता। धान्यपशुहिरण्यकुप्य-विष्टिप्रदानादौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।

(c) दूतमुखा वै राजानः, त्वं चान्ये च। तस्मादुद्धृतेष्वपि शस्त्रेषु यथोक्तं वक्तारो दूताः। तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः। परस्यैतद्वाक्यमेष दूतधर्मः इति।

 ( *Continued* )

Scanned with CamScanner

12. Explain in Sanskrit any *one* of the following with reference to the context : 10

(a) प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

(b) व्यवस्थितार्य मर्यादः कृतवर्णा श्रमस्थितिः।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति॥

★★★



Scanned with CamScanner

# TDP (Honours) 3rd Semester Exam., 2018

## SANSKRIT

( Honours )

THIRD PAPER

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

Answer **eight** questions, taking **two** from each Unit

*Candidates are required to give their answers in their own words as far as practicable*

UNIT—I

1. *(a)* Discuss the merits and demerits of Bāṇa's prose with illustrative references from your text, *Śukanāsopadeśa*. 10

*Or*

*(b)* Give a brief account of the advice imparted by Śukanāsa to prince Candrāpīḍa:



Scanned with CamScanner

2. Translate preferably in English any *two* of the following : 5×2=10

(a) नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।

(b) अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽत्यन्ततीव्रः दर्पदाहज्वरोष्मा।

(c) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

3. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य।

(b) कुसुमशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्।

## UNIT—II

4. (a) Discuss the literary style of Bhāravi with special reference to your prescribed text. 10

*Or*

*(b)* Give a short account of the speech delivered by वनेचर to युधिष्ठिर in the *Kirātārjunīyam*, Canto I.

**5.** Translate preferably in English any *two* of the following : 5×2=10

*(a)* असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्
न वाधतेऽस्य त्रिगणः परस्परम्॥

*(b)* निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽथमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम्॥

*(c)* गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्
मनोरमामात्मवधूमिव श्रियम्॥



Scanned with CamScanner

6. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः॥

(b) भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः॥

## UNIT—III

7. (a) Estimate the value of *Bhaṭṭikāvyam* as a poetical work citing suitable examples from your text. 10

*Or*

(b) Summarise in your own words the main events of *Bhaṭṭikāvyam*, Canto II.

8. Translate preferably in English any *two* of the following : 5×2=10

(a) वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण॥



Scanned with CamScanner

(b) सितारविन्दप्रचयेषु लीनाः

संसक्तफेणेषु च सैकतेषु।

कुन्दावदाताः कलहंसमालाः

प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

(c) आत्मम्भरिस्त्वं पिशितैर्नराणां

फलेग्रहीन् हंसि वनस्पतीनाम्।

शौवस्तिकत्वं विभवा न येषां

व्रजन्ति तेषां दयसे न कस्मात्॥

9. Explain in Sanskrit with reference to the context any *one* of the following : 10

(a) प्रभातवाताहतिकम्पिताकृतिः

कुमुद्वतीरेणुपिशङ्गविग्रहम्।

निरास भृङ्गं कुपितेव पद्मिनी

न मानिनी संसहतेऽन्यसङ्गमम्॥

(b) बलिर्बबन्धे जलधिर्ममन्थे

जह्रेऽमृतं दैत्यकुलं विजिग्ये।

कल्पान्तदुःस्था वसुधा तथोहे

येनैष भारोऽतिगुरुर्न तस्य॥

( Turn Over )

## UNIT—IV

10. (a) Discuss after Kauṭilya the necessity of 'इन्द्रियजय' for a king. 10

*Or*

(b) ''मन्त्रपूर्वाः सर्वारम्भाः।''

Explain the views of Kauṭilya's predecessors and of his own on the subject of 'मन्त्रज्ञानम्' and 'मन्त्ररक्षणम्' in the light of the above statement.

11. Translate preferably in English any *two* of the following : 5×2=10

(a) धर्माधर्मौ त्रय्याम्। अर्थानर्थौ वार्तायाम्। नयापनयौ दण्डनीत्याम्। बलाबले चैतासां हेतुभिरन्वीक्ष्यमाणा आन्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

(b) 'न' इति विशालाक्षः। सहक्रीडितत्वात् परिभवन्त्येनम्। ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत, समानशीलव्यसनत्वात् ते ह्यस्य मर्मज्ञभयान्नापराध्यन्ति।

(c) दूतमुखा वै राजानः, त्वं चान्ये च। तस्मादुद्धृतेष्वपि शस्त्रेषु यथोक्तं वक्तारो दूताः। तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः। परस्यैतद्वाक्यमेष दूतधर्मः।



Scanned with CamScanner

12. Explain in Sanskrit any *one* of the following with reference to the context : 10

(a) प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

(b) सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम्॥

★★★

Scanned with CamScanner